① 34.5 × 15.5 × 01 c.m. पेज = (96)
मूहर्तचिंतामणि

श्रीप्रकरणं अथवस्तुप्रकरणं आदौवटद्वारंभः
ग्रहदिव सौवि वाटोऽदोषास्तुनेष्टा ॥ इति श्री
मुहूर्तचिंता मणौया

② पेज = 1 (19) 28.5 × 11 × 0.1 C.M.

नच्चावयस्तं वयस्तं च्चावि नाविपीडितं सनाघसपैव

चबडेतेपाठकागुणाः 64 मक्षुरं च

③ पूर्वमीमांसार्थसंग्रह संवत् १९०९
पेज -1(31) 29 × 11.5 × 0.1 c.m.
लेखक - श्रीमत्महोपाध्यायलौगाक्षिभास्कर

साक्षात्परंपरयावाया गादिधार्यप्रतिपादकत्वं
विरचित पूर्वमीमांसार्थसंग्रहनामकप्रकरणम-
-गाच्चरमवर्णादिवत्तस्य

(५) विषय – व्याकरण

पेज = 5 30 × 10.5 × 0.2 c.m

श्री गणेशाय नमः। श्रीं ब्राह्मी ...

बोडशानूपानी ...

वि ५८

ग्रामप्रकरणं अथवास्तुप्रकरणं आदौ गृहारंभः यद्भं द्व्यंकसुतेशदिङ्मितमसौ ग्रामः शुभो नामभात्स्वं व
र्गं द्विगुणं विधाय परवर्गाढ्यं गजैः शेषितं काकिण्यस्त्वनयोश्च तद्विवरतो यस्याधिकाः सोऽर्थदो
द्वारं सद्विजवैश्यशूद्रनृपराशीनां हितं पूर्वतः १ गोसिंहनक्रमिथुनं निवसेन्न मध्ये ग्रामस्य पूर्वककुभो
लिझषांगनाश्च कर्कीधनुस्तुलभमेषघटाश्च तद्वद्वर्गाः स्वपंचमपरा बलिनः स्युरैन्द्र्याः २ एकोनितेष्ट
र्क्षहताद्वितिथ्यो रूपोनितेष्टायहतेंदुनागैः युक्ताद्वनेभ्याप्तिघ्नाद्विभक्ताद्भूपाश्विभिः शेषमितो हि पिंडः
स्वेष्टायनक्षत्रभकोष्टदैर्घ्यमन्याहि स्त्यृतिर्विस्तृतिमत्र दीर्घता अथायाः ध्वजो धूम्रहरिश्वगोखरेभध्वांक्षका
पिंडे त्र्यहृताष्टशेषिते ध्वजादिकाः सर्वदिशि ध्वजे मुखं कार्यं हरौ पूर्वयमोत्तरे वृषे प्राच्यां वृषे प्राग्यमयोर्ग
जेऽथवा पश्चादुदक्पूर्वयमे द्विजादितः ४ गृहेशभतन्त्र्योः सुतविन्ननाशोऽर्केन्दुहीनं भमुखे विवलेस्तनीचे क ५८

तास्वानाः सुर्दतिगणाश्चभाः ५ प्रदक्षिणगता श्रेष्ठा याम्यायां मृत्युपक्षिणाः ॐ नाम्नगाहृजं तोपि पमावामेवा

रत्नवनः ६ शुद्धायेपश्चाकृते स्थिताश्चगणेनैकादशग्नेजेन हितीयेशेषोडशाश्चगणान्तनीयेनकविद्धेजेन ७ ग

गनिहृत्तोमुमदंष्ट्रेशानेमृद्धभुवैः क्षिप्रवैरैः पुनर्गमः हीयेनलेदाहणभेनयौश्रभे स्त्रीगेहपुत्रान्यविना

शनेक्रमात् ८ अथनततमासतिथिकालवासरोद्भवमूलसंमुखरविनत्रादिकूपः भृगुवक्रनादिपरिवा

व्यादंडकापुवतीरजोथमुविनोन्यवादिकं ९ मृतपत्नीकरविनर्कसांख्यकालियायमसौरिरविभो

मवासराः अपिवामपृष्ठगविपुत्रयाडलोवसपंचकाभिजिदथापिदक्षिणे १० लग्नेजन्मतननोःमृतिश

हसहितनानषष्ठेनदीयगवालग्नेकुंभमीनतननवलवतनूवापिपृष्ठोदयेच पृष्ठाणांसेष्यन्तंदशानश

निरयोसमनमेवापिकाव्यः केंद्रेवक्राद्भवकियग्रहदिवसविवाहोक्रदोषाश्चनेष्टा ॥ इतिश्रीमुहूर्तचिंतामणौया

हं=द्वि

१९ नत्वावक्तं वा क्रं चापि नपीडितं सनाथस्यैव देशस्य नवर्णाः संकरं
गताः ७५ गीती शीघ्री शिरःकं पीयथा लिखितपाठकः अनर्थ
ज्ञोऽल्पकंठश्च षडेते पाठकाधमाः ७६ चतुरक्षरखटं पंचवंवर्जितं च त्रि×
पुनः पुनः आम्रेडितं तत्तद्ज्ञेयं धाम्ने धाम्ने इति निदर्शनम् ७७
सा पतेवाकृते वा यत्र द्व्यत्र कुशोदरं उपचारः सविज्ञेयः उभेष्ठ सु=द्वि०४
अद्रेति निदर्शनम् ७८ सप्तविधाः संयोगपिंडाः अयस्पिंडो दारु
पिंडः ऊर्णापिंडो ज्वालापिंडो मृत्पिंडो वायुपिंडो वज्रपिंडश्चेति १९
संयमान्विधादयस्पिंडाः स्यांतस्थान्दारुपिंडवत् अंतस्थायम

त्र्यथ×३

ष्टीः द्वि·२ शर्वा = द्वि २

ज्यते सर्वानुनासिकं विंद्याच्छेषमन्योपधानिकम् ६९ यरलवाः
शषसहा रज्यंते चोपधानिके वर्णान्ते रज्यते यस्तु सर्वैर्वर्णैनुना
सिकः ७० नासादुत्पद्यते रंगः कांस्येन सममिस्वनः मृदुश्चैव
द्विमात्रः स्याद्दृष्टिमानिति निदर्शनम् ७१ यथा व्याघ्री हरेत्पुत्रा
न्दंष्ट्राभिश्चनुपीडयेत् भीता पतनभेदाभ्यां तद्वद्वर्णं प्रयोजये
त् यथा सुमत्तनागेंद्रः पदात्पदं निधापयेत् एवं पदं पदाद्यंत
दर्शनीयं पृथक्पृथक् ७३ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु
थापरः धैर्यं लयसमत्वं च षडेते पाठका गुणाः ७४ मधुरं च

मी०अ० माहात्म्यं परंपरया वा यागादिधर्मप्रतिपादकत्वं सिद्धं सोयं धर्मो यदु
३१ द्दिश्य विहितः तदुद्देशेन क्रियमाणस्तद्धेतुः ईश्वरार्पणबुद्ध्या क्रिय
माणस्तु निःश्रेयसहेतुः न च तदर्पणबुद्ध्यानुष्ठाने प्रमाणाभावः य
त्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौन्तेय
तत्कुरुष्व मदर्पणमिति भगवद्गीतास्मृतेरेव प्रमाणत्वात् स्मृतिचर
णे तु प्रमाणस्य श्रुतिमूलकत्वेन व्यवस्थापनात् बालानां सुख
बोधाय भास्करेण सुमेधसा रचितोयं समासेन जैमिनीयार्थसंग्र राम
हः इति श्रीमहामहोपाध्यायलौगाक्षिभास्करविरचित पूर्वमी ३१
मांसार्थसंग्रहनामकं प्रकरणमगाच्चरमवर्णध्वंसम् ॥ १९०९

सि॰ति॰ १ श्रीगणेशायनमः श्रीचार्हन्तीचरणेगुणेप्समेद्यार्षित्तिरहर्दिवं नोष्ट्र्यमानोप्यगुणार्विनुर्विजयन्तेतरां १ पूर्वार्द्धेकथितास्तुर्य्येपंचमाध्यायवर्त्तिनः अथयात्रथ
कथ्यंतेतत्तीपाध्यायगोचराः २ तत्रादौदशलकाराःप्रदर्श्यंते लट् ।लिट् ।लुट् ।लिङ्।लेट्।लोट्।लङ्।लृट्।लुङ्।लृङ्। एषुपंचमोलकारश्छंदोमात्रगो
चरः वर्त्तमानेलट् वर्त्तमानक्रियावृत्तेर्द्धातोर्लट्स्यात् अटावितौ लःकर्मणिचभावेचाकर्मकेभ्यः लकाराःसकर्मकेभ्यःकर्मणिकर्त्तरिस्युरकर्मके
भ्योभावेकर्त्तरिच लस्याधिकारोयं तिप्तसझि सिप्थस्थ मिप्वस्मस् ताऽऽतांझथासाथांध्वंमिड्वहिमहिङ् एतेष्टादशलस्यादेशाःस्युः लः
परस्मैपदम् लादेशाःपरस्मैपदसंज्ञाःस्युः तङानावात्मनेपदम् तङ्प्रत्याहारःशानचकानचौचैतत्संज्ञाःस्युः पूर्वसंज्ञापवादः अनुदात्तङितआ
त्मनेपदम् अनुदात्तेतउपदेशेयोङित्तदंतात्चधातोर्लस्यस्थानेआत्मनेपदंस्यात् स्वरितञितःकर्त्रभिप्रायेक्रियाफले स्वरितेतोञितश्चधातोरात्म
नेपदंस्यात्कर्त्तृगामिनिक्रियाफले शेषात्कर्त्तरिपरस्मैपदम् आत्मनेपदनिमित्तहीनाद्धातोःकर्त्तरिपरस्मैपदंस्यात् तिङस्त्रीणित्रीणिप्रथमम
ध्यमोत्तमाः तिङउभयोःपदयोस्त्रयस्त्रिकाःक्रमादेतत्संज्ञाःस्युः तान्येकवचनद्विवचनबहुवचनान्येकशः लब्धप्रथमादिसंज्ञानितिङस्त्रीणित्रीणि
वचनानिप्रत्येकमेकवचनादिसंज्ञानिस्युः युष्मद्युपपदेसमानाधिकरणेस्थानिन्यपिमध्यमः तिङ्वाच्यकारकवाचिनियुष्मदिप्रयुज्यमानेचम
ध्यमःस्यात् प्रहासेचमन्योपपदेमन्यतेरुत्तमएकवच्च मन्यधातुरूपपदंयस्यधातोस्तस्मिन्प्रकृतिभूतेसतिमध्यमःस्यात् परिहासेगम्यमानेम राम॰

न्यतेस्मदुत्तमः स्यात् सचैकार्थस्य वाचकः स्यात् अस्मद्युत्तमः तथाभूतेस्मद्युत्तमः स्यात् शेषेप्रथमः मध्यमोत्तमयोरविषयेप्रथमः स्यात् भूसत्तायां क
र्तृविवक्षायां भूतिप् इतिस्थिते तिङ्शित्सार्वधातुकम् तिङः शितश्चधातोरित्यधिकारोक्ताएतत्संज्ञाःस्युः कर्त्तरिशप् कर्त्रर्थेसार्वधातुकेपरेधा
तोःशप्स्यात् शपावितौ सार्वधातुकार्द्धधातुकयोः अनयोःपरयोरिगंतांगस्यगुणःस्यात् अवादेशः भवति भवतः झोंतः प्रत्ययावयव
स्यझस्यांतादेशःस्यात् अतोगुणे भवंति भवसि भवथः भवथ अतोदीर्घोयञि अतोंगस्यदीर्घःस्या यञादौसार्वधातुकेपरे भवामि भवावः
भवामः सःभवति तौभवतः तेभवंति त्वंभवसि अहंभवामीत्यादि एहिमन्येओदनंभोक्ष्यसेभुक्तःसोतिथिभिः एतं एतंवामन्येओदनंभोक्ष्ये
थे भोक्ष्यध्वे भोक्ष्ये भोक्ष्यावहे भोक्ष्यामहे इत्यादि मन्यसे मन्येथे मन्यध्वे इत्यर्थः युष्मद्युपपदे इत्याद्यनुवर्त्तते तेनेहन एतुभवान्मन्यतेओदनंभोक्ष्ये इ
ति प्रहासेकिं यथार्थकथने माभूत् एहिमन्यसेओदनंभोक्ष्यइतिभुक्तः सोतिथिभिः परोक्षेलिट् भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट्स्यात् लस्यति
बादयः लिट्च लिडादेशस्तिङार्द्धधातुकसंज्ञएवस्यान्नतुसार्वधातुकसंज्ञः तेनशबादयः परस्मैपदानांणलतुसुस्थलथुसणल्वमाः लिटस्ति
बादीनांनवानांणलादयोनवस्युः भूअइतिस्थिते भुवोवुग्लुङ्लिटोः भुवोवुगागमोःस्यात् लुङ्लिटोरचि नित्यत्वाद्वुग्गुणवृद्धी
बाधते एकाचोद्वेःप्रथमस्यद्वेस्तः प्रथमस्यअजादेर्द्वितीयस्यसधिकृत्य लिटिधातोरनभ्यासस्य लिटिपरेनभ्यासधात्ववयवस्यै

सि॰ ति॰ २ कांचः आदिभूतादचः परस्य तु द्वितीयस्य भूव् भूव् अ इति स्थिते पूर्वोऽभ्यासः अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् हलादिः शेषः अभ्यासस्या
दिर्हल् शिष्यते अन्ये हलो लुप्यन्ते इति वलोपः ह्रस्वः अभ्यासस्याचो ह्रस्वः स्यात् भवतेरः भवतेरभ्यासोकारस्याल्लिटि अभ्यासे चर्च्च अभ्या
से झलां चरः स्युर्जशश्च झशां जशः खयां चरः तत्रापि प्रकृतिजशां प्रकृतिजशः प्रकृतिचरां प्रकृतिचरः इति विवेकः आन्तरतम्यात् असि
द्धवदत्राभात् इत ऊर्ध्वमापादपरिसमाप्ते राभीयं समानाश्रये तस्मिन्कर्त्तव्ये तदसिद्धं स्यात् इति वुकोऽसिद्धत्वादुवङ् प्राप्तेः वुग्युटा
वुवङ्यणोः सिद्धो वक्तव्यो बभूवतुः बभूवुः आर्धधातुकस्येड्वलादेः वलादेरार्धधातुकस्येडागमः स्यात् बभूविथ बभूवथुः बभू
व बभूविव बभूविम अनद्यतने लुट् भविष्यत्यनद्यतने धातोर्लुट् स्यात् स्यतासी लृलुटोः लृ इति लृङ्लृटोर्ग्रहणं धातोः स्यतासी ए
तौ प्रत्ययौ स्तः लृलुटोः परतः शबाद्यपवादः आर्धधातुकं शेषः तिङ्शिद्भ्योन्यो धातोरिति विहितः प्रत्यय एतत्संज्ञः स्यात् इट् लुटः
प्रथमस्य डारौरसः डारौरस एते क्रमात्स्युः डित्वसामर्थ्यादभस्यापि टेर्लोपः पुगन्तलघूपधस्य च पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्या
त्सार्वधातुकार्धधातुकयोः येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात् तेन भिनत्तीत्यादावनेकव्यवहितस्येको न गुणः भवित् आ अत्रेको
गुणप्राप्ते दीधीवेवीटां दीधीवेव्योरिटश्च गुणवृद्धी न स्तः भविता तासस्त्योर्लोपः तासेरस्तेश्च लोपः स्यात्सादौ प्रत्यये परे रि च रादौ राम॰ २

प्रत्यये परे प्राग्वत् भवितारौ भवितारः भवितासि भवितास्थः भवितास्थ भवितास्मि भवितास्वः भवितास्मः लृट् शेषे च भविष्यदर्थाद्धातोर्लृ
ट् क्रियार्थायां क्रियायां सत्यामसत्यां च स्यः इट् भविष्यति भविष्यतः भविष्यन्ति भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्यावः भ
विष्यामः लोट् च विध्यादिष्वर्थेषु लोट् स्यात् आशिषि लिङ्लोटौ एरुः लोट इकारस्य उः स्यात् भवतु तुह्योस्तातङ्ङाशिष्यन्यतरस्यां आ
शिषि तुह्योस्तातङ् वा स्यात् अनेकाल्त्वात्सर्वादेशः यद्यपि ङिच्चेत्ययमपवादस्तथापि अनन्यार्थङित्वे च नङादिषु चरितार्थ इति गुणवृद्धि
प्रतिषेधसंप्रसारणादिषु चेतपास्तं भवतु प्रयोजनङ्कारे तातङि मंडूरं प्रवृत्तः परेण बाध्यते इहोत्सर्गापवादयोरपि समबलत्वात् भवतात्
लोटो लङ्वत् लोटो लङ्वत्कार्यं स्यात् तेन तामादयः सलोपश्च तथाहि तस्थस्थमिपां तान्तंतामः ङितश्चतुर्णां तामादयः क्रमात्स्युः नित्यं ङि
तः सकारान्तस्य ङित उत्तमस्य नित्यं लोपः स्यात् अलोऽन्त्यस्येति सलोपः भवतां भवंतु सेर्ह्यपिच्च लोटः सेर्हिः स्यात्सोऽपिच्च अतो हेः अतः परस्य
हेर्लुक् स्यात् भव भवतात् भवतं भवत मेर्निः लोटो मेर्निः स्यात् आडुत्तमस्य पिच्च लोडुत्तमस्याडागमः स्यात्सः पिच्च हिन्योरुत्वं न इकारोच्चा
रणसामर्थ्यात् भवानि भवाव भवाम अनद्यतने लङ् अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात् लुङ्लङ्लृङ्क्ष्वडुदात्तः एष्वंगस्याडाग
मः स्यात्सचोदात्तः इतश्च ङितो लस्य परस्मैपदमिकारान्तं यत्तस्य लोपः स्यात् अभवत् अभवतां अभवन् अभवः अभवतं अभवत अ

लि.ति. ३ भवं अनवाव अनवाम विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् एष्वर्थेषु धातोर्लिङ् स्यात् विधिः प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्त्तनं
निमंत्रणं नियोगकरणं आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्त्तनं आमंत्रणं कामचारानुज्ञा अधीष्टः सत्कारपूर्वको व्यापारः प्रवर्त्तनायां लिङ् वतु
णं एष्वनुगुपादानं तु प्रपंचार्थं यासुट् परस्मैपदेषूदात्तो ङिच्च लिङः परस्मैपदानां यासुडागमः स्यात् स चोदात्तो ङिच्च ङित्वोक्तिर्ज्ञायते क्वचिदनुबंधका
र्यप्यनल्विधाविति निषेध इति आदिभ्यस्यप्रानचः प्रिल्वमपीहलिंगे सुट्तिथोः लिङ् सकारथकारयोः सुट् स्यात् सुटायासुट् न बाध्यते लि
ङो यासुट् तकारथकारयोः सुडिति विषयभेदात् लिङः सलोपोऽनंत्यस्य सार्वधातुकलिङोऽनंत्यस्य सस्य लोपः स्यात् इति सकारद्वयस्यापि निवृत्तिः
सुटः अवणंत्वाशीर्लिङि स्फुटतरं तु तत्रात्मनेपदे अतोयेयः अतः परस्य सार्वधातुकावयवस्य या इत्यस्य इय् स्यात् गुणः यलोपः सार्वधातुके ति
किं चिकीर्ष्यात् मध्येपवादन्यायेन हि अतोलोप एव हि बाध्येत भवेदित्यादौ तु परत्वाद्दीर्घः स्यात् भवेतां झेर्जुस् लिङो झेर्जुस् स्यात् जउत् उस्य
पदांतात् अपदांतादवर्णादुसि पररूपमेकादेशः स्यादिति प्राप्ते परत्वान्नित्यत्वाच्चातोयेय इति प्राचः यद्यप्यंतरंगत्वात् पररूपं न्याय्यं तथापि
यास इत्यस्य इय् इति व्याख्येयं एवं च सलोपस्यापवाद इय् अतोयेय इत्यत्र तु संधिराषः भवेयुः भवेः भवेतं भवेत भवेयं भवेव भवेम लिङा
शिषि आशिषि लिङ्लिटौ इत्यार्द्धधातुकसंज्ञः स्यात् किदाशिषि आशिषि लिङो यासुट् कित् स्यात् स्कोरिति सलोप क्ङिति च गित्किन्ङिन्नि एस० ३

मित्ते इग्लक्षणे गुणवृद्धी न स्तः भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयास्त भूयासं भूयास्व भूयास्म लुङ् भूतार्थे धातोर्लुङ् स्यात् माङि लुङ् सर्वलकारा
पवादः स्मोत्तरे लङ् च स्मोत्तरे माङि लुङ् स्यात् च्लि लुङि धातोर्लुङि परे च्लिप्रत्ययः स्यात् शबाद्यपवादः च्लेः सिच् च्लेः सिजादेशः स्यात् इचावितौ गाति
स्थाघुपाभूभ्यः सिचः परस्मैपदेषु एभ्यः परस्य सिचो लुक् स्यात् गापाविहेणादेशपिबती गृह्येते भूसुवोस्तिङि भूसुवोः सार्वधातुके तिङि गुणो न स्यात् अ
स्तिसिचोऽपृक्ते सिच्च अस् च इति समाहारद्वंद्वः सिच् प्राप्तस्य सौत्रे नत्वं अस्तीत्यव्ययेन कर्मधारयः ततः पंचम्याः सौत्रो लुक् विद्यमानात्सिचोऽस्तेश्च परस्यापृ
क्तस्य हल ईडागमः स्यात् इति नेह सिचो लुप्तत्वात् अभूत् हलः किं एधिषि अभूतां सिजभ्यस्तविदिभ्यश्च सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्संबंधिनो झेर्जुस् स्या
त् इति प्राप्ते आतः सिज्लुकि आदंतादेव झेर्जुस् स्यात् अभूवन् अभूः अभूतं अभूत अभूवं अभूव अभूम न माङ्योगे अडाटौ न स्तः मा भवान् भूत् (
मास्म भवत् भूद्वा लिङ्निमित्ते लृङ् क्रियातिपत्तौ हेतुहेतुमद्भावादौ लिङ्निमित्ते तत्र भविष्यदर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायां
अभविष्यत् अभविष्यतां अभविष्यन् अभविष्यः अभविष्यतं अभविष्यत अभविष्यं अभविष्याव अभविष्याम ते प्राग्धातोः ते गत्युपसर्ग
संज्ञका धातोः प्रागेव प्रयोक्तव्याः आनि लोट् उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्यानीत्यस्य नस्य णः स्यात् प्रभवाणि दुरः षत्वणत्वयोरुपसर्ग
त्वप्रतिषेधो वक्तव्यः दुःस्थितिः दुर्भवाणि अंतः शब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यं अंतर्द्धा अंतर्द्धिः अंतर्भवाणि शेषविभाषाकखादावषां

8

सि॰ति॰ ४ त उपदेशे उपदेशोच्चारणादिषु धात्वर्जं नन्दादेरन्यस्मिन्धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं वा स्यात् प्रणिभवति प्रनिभवति इत्युपसर्गाणामसमस्तत्वेऽपि सं
हितानित्या तदुक्तं संहितैकपदे नित्या नित्या धातूपसर्गयोः नित्या समासे वाक्ये तु सा विवक्षामपेक्षते १ सत्ताद्यर्थनिर्देशश्चोपलक्षणं यागात्स्वर्गो भवतीत्यादावुत्प
द्यते इत्याद्यर्थात् उपसर्गास्त्वर्थविशेषस्य द्योतकाः प्रभवति पराभवति संभवति अनुभवति अभिभवति उद्भवति परिभवतीत्यत्र विलक्षणार्थावगतेः उक्तं च उप
सर्गेण धात्वर्थो बलादन्यः प्रतीयते प्रहाराहारसंहारविहारपरिहारवदिति १ एध वृद्धौ कस्यान्ताः षट्त्रिंशदनुदात्तेतः टित आत्मनेपदानां टेरे टितो लस्यात्मने
पदानां टेरेत्वं स्यात् एधते सार्वधातुकमपित् अपित्सार्वधातुकं ङिद्वत्स्यात् आतो ङितः अतः परस्य ङितामाकारस्य इय् स्यात् एधेते एधन्ते थासः से टितो
लस्य थासः से स्यात् एधसे एधेथे एधध्वे अतो गुणे एधे एधावहे एधामहे इजादेश्च गुरुमतोऽनृच्छः इजादिर्यो धातुर्गुरुमानृच्छत्यन्यस्ततः आम् स्याल्लिटि
आमो मकारस्य नेत्वं आस्कासोराम्विधानाज्ज्ञापकात् आमः आमः परस्य लुक् स्यात् कृञ्चानुप्रयुज्यते लिटि आमन्ताल्लिट्पराः कृभ्वस्तयोऽनुप्रयुज्य
न्ते आम्प्रत्ययवत्कृञोऽनुप्रयोगस्येति सूत्रे कृञ्ग्रहणं सामर्थ्यादनुप्रयोगोऽन्यस्यापीति ज्ञायते तेन कृभ्वस्तियोग इत्यतः कृञो द्वितीयेति ञकारेण प्रत्याहारा
श्रयणात्कृभ्वस्तिलाभः तेषां क्रियासामान्यवाचित्वादाम्प्रकृतीनां विशेषवाचित्वात्तदर्थयोरभेदान्वयः संपदिस्तु प्रत्याहारे तत्त्वेऽप्यनन्वितार्थत्वान्न प्रयुज्य
ते कृञस्तु क्रियाफले परगामिनि परस्मैपदे प्राप्ते आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः आम्प्रत्ययेन तुल्यं राम ५

अनुप्रयुज्यमानात्कृञोऽप्यात्मनेपदं स्यात् इह पूर्ववदित्यपोद्धेऽनुवर्त्य वाक्यभेदेन संबध्यते पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति तेन कर्तृगे फले इदं चकार त्यादौ न त
ङ् लिटस्तझयोरेशिरेच् लिडादेशयोस्तझयोरेश् इरे च एतौ स्तः एकारोच्चारणं ज्ञापकं तङ् आदेशानां टेरेत्वं नेति तेन डारौरसः नेति रूपं इति सिध्यते असंयोगाल्लि
ट्कित् असंयोगात्परोऽपिल्लिट्कित्स्यात् क्ङिति चेति निषेधात्सार्वधातुकार्धधातुकयोर्गुणो न १८ इज्यात्परत्वाद्गुणे प्राप्ते द्विर्वचनेऽचि द्वित्वनिमित्तेऽचि परे अच
आदेशो न स्यात् द्वित्वे कर्तव्ये उरत् अभ्यासऋवर्णस्य अत्स्यात्प्रत्यये परे रपरत्वं हलादिः शेषः प्रत्यये किं ववृश्च कुहोश्चुः अभ्यासकवर्गहकारयोश्चवर्गा
देशाः स्यात् एधांचक्रे एधांचक्राते एधांचक्रिरे एकाच उपदेशेऽनुदात्तात् उपदेशे यो धातुरेकाजनुदात्तश्च ततः परस्य वलादेरार्धधातुकस्येण्न स्यात् उप
देश इत्युभयान्वयि एकाच इति किं यङ्लुगन्तवृत्तिर्यथा स्यात् स्मरेति हि श्तिपा शपानुबंधेन निर्दिष्टं यद्गणेन च यत्रैकाच्ग्रहणं चैव पंचैतानि न यङ्लुकि १
एतच्चेष्ठे वैकाज्ग्रहणेन ज्ञाप्यते अच इत्येवैकत्वविवक्षा पातकृत्तो ग्रहणेन च सिद्धे एकाज्ग्रहणसामर्थ्यादनेकाचोपदेशो व्यावर्त्यते तेन वधेर्हन्तुपदेशे
एकाचोऽपि न निषेधः आदेशोपदेशेऽनेकाच्त्वात् अनुदात्ताश्चानुपदमेव संग्रहीष्यन्ते एधांचकृषे एधांचक्राथे इणः षीध्वंलुङ्लिटां धोऽङ्गात् इणंता
दंगात्परेषां षीध्वंलुङ्लिटां धस्य ढः स्यात् एधांचकृढ्वे एधांचक्रे एधांचकृवहे एधांचकृमहे एधांबभूव अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न अ
स्पष्टा हि कस्त्वानुप्रयुज्यत इति कश्चित्तिवाक्यपात् अत आदेः अभ्यासस्यादेरतो दीर्घः स्यात् परत्वापवादः एधामास एधामासतुः एधामासुः इत्य

सु॰ति॰ ५ दि एधिता एधितारौ एधितारः एधितासे एधितासाथे धि च धातोः प्रत्यये परे सलोपः एधिताध्वे ह एति तासस्त्योः सस्य हः स्यादेतिपरे एधिताहे एधितास्वहे ए
धितास्महे एधिष्यते एधिष्येते एधिष्यन्ते आमेतः लोट एकारस्याम् स्यात् एधतां एधेतां एधन्तां सवाभ्यां वामौ सवाभ्यां परस्य लोट एतः क्रमाद्वम्ऽमौ स्तः ।
एधस्व एधेथां एधध्वं एत ऐ लोडुत्तमस्य एत ऐ स्यादामोऽपवादः एधै एधावहै एधामहै आडजादीनां अजादीनामाट् स्याल्लुङादिषु अटोऽपवादः आटश्च
ऐधत ऐधेतां ऐधन्त ऐधथाः ऐधेथां ऐधध्वं ऐधे ऐधावहि ऐधामहि लिङः सीयुट् सलोपः एधेत एधेयातां झस्य रन् लिङो झस्य रन् स्यात् एधेरन् एधे
थाः एधेयाथां एधेध्वं इटोऽत् लिङादेशस्येटोऽत्स्यात् एधेय एधेवहि एधेमहि आशीर्लिङि आर्धधातुकत्वाल्लिङः सलोपो न सीयुट् सुटोः प्रत्ययावय
वत्वात् षत्वं एधिषीष्ट एधिषीयास्तां एधिषीरन् एधिषीष्ठाः एधिषीयास्थां एधिषीध्वं एधिषीय एधिषीवहि एधिषावहि एधिषीमहि ऐधिष्ट ऐधिषा
तां आत्मनेपदेष्वनतः अनकारात्परस्यात्मनेपदेषु झस्य अत् इत्यादेशः स्यात् ऐधिषत ऐधिष्ठाः ऐधिषाथां इणः षीध्वं लुङ् लिटां धोऽङ्गात् ऐधिढ्वं
इण्णन्त एव इणाद् गृह्यते इति मते तु ऐधिध्वं ढधयोर्वस्य मस्य च द्वित्वविकल्पात् षोडश रूपाणि ऐधिषि ऐधिष्वहि ऐधिष्महि ५

राम॰
५